मत्स्यनाशकः, पुं, ( नाशयतीति नश् + णिच् + ण्वुल् । मत्स्यानां नाशकः । सदैव मत्स्यभक्षकतयास्य तथात्वम् । ) कुररपक्षी । इति भूरिप्रयोगः ॥ मत्स्यनाशकर्त्तरि त्रि ॥

मत्स्यनाशनः, पुं, ( नाशयतीति नश् + णिच् ल्युः । मत्स्यस्य नाशनः । ) कुररपक्षी । इति हेमचन्द्रः । ४ । ४०१ ॥

मत्स्यपित्ता, स्त्री, ( कटुरोहिणी । इत्यमरः । २ । ४ । ८६ ॥ ( तथा चास्याः पर्य्यायाः ।
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ )

मत्स्यबन्धी, [न्] पुं, ( मत्स्यान् बन्धुं धर्त्तुं शीलमस्य । मत्स्य + बन्ध + इनिः । ) धीवरः । यथा,
"कैवर्त्तो धीवरो दाशो मत्स्यबन्धी च जालिकः ॥"
इति हलायुधः ॥"
("अथान्येद्युस्तैर्यमकिङ्कराभैर्मत्स्यबन्धिभिः
प्रभात आगत्य जालैराच्छादितो ह्रदः ।"
इति पञ्चतन्त्रे । ५ । २८ । )

मत्स्यबन्धिनी, स्त्री, ( मत्स्यबन्धिन् + स्त्रियां ङीप् । ) मत्स्यधानी । इति हलायुधः ॥

मत्स्यरङ्कः, पुं, ( मत्स्यरङ्ग । पृषोदरादित्वात् साधुः । ) मत्स्यरङ्गपक्षी । इति भूरिप्रयोगः ॥

मत्स्यरङ्गः, पुं, ( मत्स्यान् रङ्गति भक्षणार्थं तत्समीपं गच्छतीति । मत्स + रगि + अच् । ) पक्षिविशेषः । माछराङ्गा इति भाषा । (यथा,
"त्रिभुवनविदितो हा मत्स्यरङ्गे कलङ्कः ॥"
इत्युद्भटः ॥)
तत्पर्य्यायः । झम्पाशी २ जलमद्गुः ३ मणीचकः ४ । इति हारावली ॥ मत्स्याशनः ५ मीनरङ्कः ६ मत्स्यरङ्कः ७ सुचिचकः ८ । इति शब्दरत्नावली ॥

मत्स्यराजः, पुं, ( मत्स्येषु राजा श्रेष्ठः समासान्तष्टच् । ) रोहितमत्स्यः । इति त्रिकाण्डशेषः ॥ विराटराजः ।
("तस्य तद्वचनं श्रुत्वा मत्स्यराजः प्रतापवान् ।"
इति महाभारते । ४ । ६८ । २९ । )

मत्स्यविन्ना, स्त्री, कटुका । इति वैद्यकम् ॥

मत्स्यवेधनं, क्ली, (मत्स्यो विध्यतेऽनेनेति मत्स्य + विध + करणे ल्युट् । मत्स्यानां वेधनमिति वा । ) वडिशम् । इत्यमरः । १ । १० । १६ ॥

मत्स्यवेधनी, स्त्री, (मत्स्यवेधन + ङीप् । ) मद्गुपक्षी । इति जटाधरः ॥ वड़िशम् । इति शब्दरत्नावली ॥

मत्स्यसन्तानिकः, पुं, (मत्स्यानां सन्तानिकात्र । ) मत्स्यव्यञ्जनविशेषः । यथा,—
"दग्धोऽङ्गारे सलवणो वेशवारेणपस्कृतः ।
सार्द्रकः कटुतैलेन मत्स्यसन्तानिको भवेत् ॥"
इति शब्दचन्द्रिका ॥

मत्स्याक्षी, स्त्री, (मत्स्यानां अक्षीणीव अक्षीणि पुष्परूपाणि चक्षूंषि यस्याः । मत्स्याक्षि + "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।" ५ । ४ । ७३ । इति षच् ङीष् च । ) ब्राह्मी । इत्यमरः । २ । ४ । १३७ ॥ सा च सोमलतायाम् । ब्राह्मीशाके इति केचित् । इति भरतः ॥ यथा,
"ब्राह्मी वयस्था मत्स्याक्षी मीनाक्षी सोमवल्लरी ।
मत्स्याक्षी शिशिरा रुच्या व्रणदोषक्षयापहा ॥"
इति राजनिर्घण्टः ॥
गण्डदूर्व्वा । इति राजनिर्घण्टः ॥
हिलमोचिका । ब्राह्मीशाकः । इति रत्नमाला ॥
( गण्डदूर्व्वार्थे पर्य्यायो यथा,—
"गण्डदूर्व्वा तु गण्डाली मत्स्याक्षी शकुलाक्षकः ॥"
मत्स्यादनी ॥ तत्पर्य्यायो गुणाश्च यथा । मछेछी हक्कमक्करी आइतिच । इति लोके ।
"मत्स्याक्षी वाह्लिका मत्स्यगन्धा मत्स्यादनीति च ।
मत्स्याक्षी ग्राहिणी शीता कुष्ठपित्तकफास्रजित् ॥
लघुस्तिक्ता कषाया च स्वाद्वी कटुविपाकिनी ।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ )

मत्स्याङ्गी, स्त्री, (मत्स्यानां अङ्गमिवाङ्गं यस्याः । ) हिलमोचिका । इति त्रिकाण्डशेषः ॥

मत्स्यादनी, स्त्री, ( मत्स्यैरद्यते इति मत्स्य + अद + ल्युट् गौरादित्वात् ङीष् । ) जलपिप्पली । इति राजनिर्घण्टः ॥ ( तथा च पर्य्यायः ॥
"जलपिप्पल्यभिहिता शारदी शकलादनी ।
मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता ॥"
मत्स्याक्षा । मछेछी इति लोके ॥ तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
"मत्स्याक्षी वाह्लिकामत्स्यगन्धा मत्स्यादनीति च ।" )

मत्स्याशनः, पुं, ( मत्स्यानश्नातीति मत्स्य + अश + ल्युः । ) मत्स्यरङ्गपक्षी । इति त्रिकाण्डशेषः ॥ मत्स्यभक्षके त्रि ॥

मत्स्यी, स्त्री, ( मत्स्य + जातौ ङीष् । ) स्त्रीमत्स्यजातिः । इति मुग्धबोधव्याकरणम् ॥

मत्स्योदरी, स्त्री, (मत्स्यस्य उदरं उत्पत्तिस्थानं यस्याः । मत्स्यगर्भे जातत्वादस्यास्तथात्वम् । ) सत्यवती सा च व्यासमाता । इति जटाधरः ॥ ( यथा देवीभागवते । २ । १ । ३८ ।
"कालिका वसुना दत्ता तरसा जालजीविने ।
नाम्ना कालीति विख्याता तथा मत्स्योदरीति च ॥")
(मत्स्या उदरे गर्भे यस्याः । ) काशीस्थतीर्थविशेषः ॥ यथा,—
"कैलासाद्रेः समायाताः सप्तकोटिमिताः प्रभो ! ।
दुर्गाणि तैः कृतानीह सप्तस्वर्गसमानि च ॥
सद्द्वाराणि सयन्त्राणि कवाटविकटानि च ।
कोटिकोटिभटाढ्यानि सर्व्वर्द्धिसहितान्यपि ॥
ततः शैलं महादुर्गं तैः काशीपरितः कृतम् ।
परिखा निकृतालिन्दा मत्स्योदर्य्या जलाविला ॥
मत्स्योदरी द्विधा जाता बहिरन्तश्चरा पुनः ।
तस्य तीर्थं महत् ख्यातं मिलितं गाङ्गवारिणि ॥
यदा संहारमार्गेण गङ्गाम्भः प्रसरेदिह
तदा मत्स्योदरीतीर्थं लभ्यते पुण्यगौरवात् ॥
सूर्य्याचन्द्रमसोः पर्व्व तदा कोटिगुणं शतम् ।
सर्व्वपर्व्वाणि तत्रैव सर्व्वतीर्थानि तत्र वै ।
तत्रैव सर्व्वलिङ्गानि गङ्गा मत्स्योदरी यतः ॥
मत्स्योदर्य्याञ्च ये स्नाता यत्र कुत्रापि मानवाः ।
कृतपिण्डप्रदानास्ते न मातुरुदरेशयाः ॥
अविमुक्तमिदं क्षेत्रं मत्स्याकारत्वमाप्नुयात् ।
परितः स्वर्धुनीवारि संसारे परिवीक्ष्यते ॥
मत्स्योदर्य्यां कृतस्नाना ये नरास्ते नरोत्तमाः ।
कृत्वापि बहुपापानि नेक्षन्ते भास्करेः पुरीम् ॥
किं स्नात्वा बहुतीर्थेषु किं तप्त्वा दुष्करं तपः ।
यदि मत्स्योदरीं स्नाताः कुतो गर्भभयं ततः ॥
यत्र यत्र हि लिङ्गानि दृष्टेवर्षिकृतान्यपि ।
तत्र मत्स्योदरीं प्राप्य सुस्नातो मोक्षभाजनम् ॥
सन्ति तीर्थान्यनेकानि भूर्भुवःस्वर्गतान्यपि ।
न समानि परं तानि कोट्यंशेनापि निश्चितम् ॥
इत्थं तीर्थं कृतं तेन विभो ! कैलासवासिना ।
गणाधिपेन सुमहत् सुमहोदरकर्म्मणा ॥"
इति काशीखण्डे ६८ अध्यायः ॥

मथ इ कुन्थे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-वधे-सक०-क्लेशे अक०-सेट् । ) इ मन्थ्यते । कुन्थो वधक्लेशौ । इति दुर्गादासः ॥

मथ ज ए गाहे । इति कविकल्पद्रुमः ॥ भ्वा०-पर०सक०-सेट् । ) ज मन्थः मथः । ए अमथीत् । इति दुर्गादासः ॥

मथनं, क्ली, ( मथ्यते इति मथ + भावे ल्युट् । ) विलोड़नम् । मथोया इति भाषा । यथा,—
"क्वाहं मन्दमतिः क्वेदं मथनं क्षीरवारिधेः ।
किं तत्र परमाणुर्वै यत्र मज्जति मन्दरः ॥"
इति भागवते । १।१।१ । टीकायां श्रीधरस्वामी ॥
अस्त्र विशेषः । यथा, हरिवंशे । २३६।१० ।
"ऐषीकमस्त्रमैन्द्रञ्च आग्नेयं शैशिरं तथा ।
वायव्यं मथनं नाम कापालमथ किङ्करम् ॥" )

मथनः, पुं, ( मथति रोगानिति मथ + कर्त्तरि ल्युः । ) गणिकारिकावृक्षः । इति रत्नमाला ॥ (मथनकारके, त्रि । केशिमथनमुण्डमथन्यादिदर्शनात् । )

मथितं, क्ली, (मथ + क्तः । ) निर्जलघोलम् । इत्यमरः ।२।६।५३॥ यथा, बृहत्संहितायाम् ।५०।२६।
"क्षारे कदल्यामथितेन युक्ते
दिनोषिते पायितमायसं यत् ॥" )
अस्य गुणाः । कफपित्तनाशकत्वम् । रोचनत्वम् । धातुपुष्टिदत्वञ्च । इति राजवल्लभः ॥ विलोड़िते, त्रि ॥ ( तथा च पर्य्यायान्तरं प्रकारान्तरञ्च यथा,—
"घोलन्तु मथितं तक्रमुदस्विच्छच्छिकापि च ।